# आत्मानं नैव जानाति यो न जानाति संस्कृतम्

**विष्णु प्रसाद उपाध्याय**
वरिष्ठशोधाध्येता
संस्कृतसंवर्धनप्रतिष्ठानम्
bishnupoudel1992@gmail.com

**सारांशः**

*सांसारिकविषयेषु अनासक्तः सन् मनुष्यः संस्कृतग्रन्थान् अधीत्य सर्वप्रथमम् आत्मनः विषये एव चिन्तयेत् अर्थात् आत्मानम् उद्धरेत् । यतो हि मनुष्यस्य आत्मा एव बन्धुः अस्ति आत्मा एव शत्रुः अस्ति । अस्मिन् लेखे आत्मानं ज्ञातुं संस्कृतं कथम् आवश्यकम् इति प्रतिपादितम् अस्ति ।*

## प्रस्तावना

'सम्' इति उपसर्गपूर्वकात् कृधातोः क्तप्रत्यये कृते सति संस्कृतम् इति पदं निष्पद्यते, यस्य अर्थः भवति शुद्धः संस्कारितः परिष्कृतः समानभावः च इति । सर्वासु भाषासु संस्कृतशब्दाः एवञ्च संस्कृतपदानि बाहुल्येन दृश्यन्ते । अर्थे तावत् भेदः नायाति किन्तु कदाचित् उच्चारणे भेदः दृश्यते । यथा सम् एतस्य उच्चारणम् आङ्ग्लभाषायां सेम इति भवति । ह्लादः एतस्य उच्चारणं ग्लाड इति भवति । तथैव फ्रेन्च-जर्मन-अरबीभाषासु अपि उच्चारणे भेदः दृश्यते ।

**'संस्कृतं नाम – दैवी वागान्वाख्याता महर्षिभिः',** संस्कृतभाषा केवलं लोकभाषा एव न अपितु देवभाषा अपि अस्ति । अद्यत्वेऽपि कोटिशः जनाः संस्कृतजीवनशैल्यां जीवन्ति । प्रायः सर्वेऽपि वैदिकपरम्परायां क्रियमाणानि सर्वाणि कर्माणि कुर्वन्ति कारयन्ति च, तथा च प्रातः जागरणानन्तरं रात्रौ शयनकालं यावत् संस्कृतभाषायां विद्यमानानां मन्त्राणां श्लोकानां च उच्चारणं कुर्वन्ति । सनातनवैदिकधर्मे गर्भाधानसंस्कारात् आरभ्य अन्त्येष्टिसंस्कारपर्यन्तं षोडशसंस्काराः संस्कृतभाषायाम् एव उपनिबद्धाः सन्ति । जैनानां महायानिनां बौद्धानां च विशालसाहित्यं संस्कृतभाषायामेव अस्ति । अन्यच्च संस्कृतभाषा एव प्रथमा अस्ति इति विभिन्नपाश्चात्यानुसन्धानपत्रमाध्यमेन ज्ञायते । संस्कृतं केवलं भाषा एव न अपितु संस्कृतम् एकः विचारः अस्ति । संस्कृतम् एका क्रान्तिः अस्ति । संस्कृतम् एका जीवनशक्तिः अस्ति । संस्कृतम् एव संस्कृतिः एवञ्च संस्कारः अस्ति । संस्कृते विश्वस्य कल्याणं निहितम् अस्ति । विश्वस्य शान्तिः निहिता अस्ति । परस्परं सहयोगभावना अस्ति । अतः एव विभिन्नेषु ग्रन्थेषु उक्तम् अस्ति–

**'वसुधैव कुटुम्बकम्'**
**'सहनाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।'**
**'सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम् ।**
**देवा भागं यथा पूर्वे सं जनाना उपासते ॥'**
**'माता भूमिः पुत्रोऽहं पृथिव्याः ।'**

अद्यत्वे द्वैतभावनाकारणात् सर्वत्र लोके समाजे असमान-अनुचितव्यवहारः आधिक्येन दृश्यते । अतः एतादृशीं द्वैतभावनां निवारयितुं संस्कृतज्ञानम् अत्यन्तम् आवश्यकं दृश्यते। पश्चिमदेशस्थाः संस्कृतं स्वजीवने आनेतुं नैरन्तर्येण प्रयतमानाः सन्ति । यथा

"अहं स्वयं संस्कृतं पठितुं वदितुं च अभ्यासं कुर्वन् अस्मि । अहं न जानामि यत् एतस्याः महत्त्वं भारतीयाः किमर्थं नावगच्छन्ति इति ।" **(रोबर्ट लाइटफुट, NASA प्रमुखः)**

"अष्टादशशताब्द्याः उत्तरार्धे संस्कृतसाहित्यस्य अनुसन्धानं विहाय कापि अन्या तादृशी विश्वव्यापिणी घटना न घटिता इति ।" **(आर्थर अन्थोनी मैक्डोनेल्)**

उक्तम् अपि अस्ति –

**जानाति विविधाः भाषाः जानाति विविधाः कलाः ।**
**आत्मानं नैव जानाति यो न जानाति संस्कृतम् ॥**

विभिन्नासु भाषाकलादिषु निपुणाः सन्तः अपि यः आत्मानं न जानाति तस्य जीवनं व्यर्थम् अस्ति । किन्तु यः विभिन्नासु भाषाकलादिषु निपुणः सन् अपि संस्कृतं जानाति सः आत्मानम् अपि ज्ञातुं शक्नोति ।

संस्कृतभाषा अन्यभाषायाः सदृशी केवलम् अभिव्यक्तेः एव भाषा न, अपितु एषा मानवस्य सर्वाङ्गीणविकासस्य कारणीभूता अपि अस्ति । प्राचीनकाले एषा अव्याकृतभाषा आसीत् अर्थात् प्रकृतिप्रत्ययानां विभाजनं नासीत् । अव्याकृतत्वात् भाषायां काठिन्यम् आसीत् अतः अनन्तरं देवानां राजा इन्द्रः प्रकृतिप्रत्ययानां व्यवस्थां कृतवान् । इत्थम् अव्याकृतभाषां व्याकृतभाषां कृत्वा पुनः संस्कारितवान् इति कारणात् देववाणी इति एतस्याः नाम जातम् ।

संस्कृतं केवलं स्वविकसितभाषा न, अपितु संस्कारितभाषा अपि अस्ति । अतः एतस्य नाम संस्कृतम् अस्ति । पाणिनि-कात्यायन-पतञ्जलीसदृशैः अनेकैः महर्षिभिः संस्कारिता भाषा अस्ति एषा । उत्तर-अमेरिकायाः दक्षिणभागस्य मैक्सिकराज्यस्य तथा च पनामाराज्यस्य सीमायां प्रायः विंशति-द्वाविंशतिशतवर्षेभ्यः पूर्वम् एकम् अनुसन्धानं कृतम् आसीत् । अनुसन्धानप्रसङ्गे तत्र एका मानवजातिः प्राप्ता । भाषाविज्ञाः विद्वांसः तासां भाषा ब्रोनसंस्कृतम् इति स्थापितवन्तः । एतेन ज्ञायते यत् संस्कृतं विश्वस्य भाषा आसीत् इति । बालीद्वीपजनानाम् अपि भाषा संस्कृतम् एव आसीत् इति अनुसन्धानद्वारा ज्ञायते ।

"संस्कृतभाषा सङ्गणकस्य यन्त्रमानवस्य प्रक्षेपकयानस्य च कृते सर्वाधिकी उपयुक्ता भाषा अस्ति इति सर्वे वैज्ञानिकाः अहर्निशम् उद्घोषयन्ति ।" **(फोर्ब्स पत्रिका (July, 1987)**

बुद्धिजीविनः वदन्ति यत् संस्कृतं समर्थसरलसरसभाषा अस्ति इति । शारीरिकव्यायामस्य कृते अपि एषा उपयुक्ता भाषा अस्ति । यथा अनुस्वारस्य (अं) तथा च विसर्गस्य (अः) संस्कृतभाषायां बहुधा प्रयोगः क्रियते । पुंल्लिङ्गशब्दाः प्रायः विसर्गान्ताः भवन्ति यथा, रामः बालकः हरिः भानुः इत्यादयः । तथैव नपुंसकलिङ्गस्य शब्दाः अनुस्वारान्ताः भवन्ति यथा - जलम्, मन्दिरम्, फलम् इत्यादयः । विसर्गस्य उच्चारणेन कपालभातिप्राणायामस्य तथा च अनुस्वारस्य उच्चारणेन भ्रामरीप्राणायामस्य सम्पूर्णं फलं प्राप्यते ।

संस्कृतभाषायाः दैनन्दिनजीवने प्रयोगेण उच्चारणेन शारीरिक्ययोग्यता अपगच्छति तथा च स्मरणशक्तौ वृद्धिः भवति इति पाश्चात्यविद्वांसः पुनः पुनः वदन्ति स्मारयन्ति च । अतः वयं सर्वे मिलित्वा संस्कृतस्य उन्नतौ सहयोगं कुर्मः । न्यूनातिन्यूनम् आत्मानं ज्ञातुम् अपि वयं संस्कृतं पठामः इति । उक्तं च गीतायाम्

**उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।**
**आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥**

जयतु संस्कृतम्